# WEST BENGAL STATE UNIVERSITY

B.A. Honours 6th Semester Examination, 2022

## SANADSE04T-SANSKRIT (DSE3/4)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

### क-विभागः

1. यथेच्छम् एकः प्रश्नः समाधेयः। 10×1 = 10

(क) को नाम सत्यव्रतसामश्रमी ? वैदिकसाहित्येषु सामश्रमिमहोदयस्य अवदानम् आलोच्यताम्।

(ख) वैदिकसाहित्येषु प्रतिविम्बितां वैदिकसंस्कृतिमाश्रित्य एकः प्रबन्धः विरच्यताम्।

### ख-विभागः

2. अधो लिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) संगणकीयं संस्कृतभाषाविज्ञानमित्यस्य कोऽर्थः ?

(ख) भाषायाः संगणकीकरणपद्धतिषु यथेच्छं द्वयम् लेख्यम्।

(ग) भाषाप्रक्रियाकरणे पदविश्लेषकोपादानस्य गुरुत्वं लेख्यम्।

(घ) भाषाप्रक्रियाकरणे सुबन्तनिर्मापकोपादानस्य गुरुत्वं लेख्यम्।

(ङ) संगणकीयभाषाविज्ञाने संस्कृतसंवाचकपद्धतिः (TTS) का ?

(च) पदपरिचायकं (POS tagger) किम् ?

(छ) पाणिनीयः अक्षरसमाम्नायः (Phonetic Component) लेख्यः।

(ज) संगणकीयभाषाविज्ञाने शब्दतात्त्विकविश्लेषकस्य (Morphological Analyzer) गुरुत्वं लेख्यम्।

### ग-विभागः

3. अधः प्रदत्तेषु विषयद्वयमाश्रित्य टीकां लिखत। 5×2 = 10

(क) स्कन्दस्वामी।

(ख) वेङ्कटमाधवः।

(ग) आनन्दतीर्थः।

(घ) रुड्लफ-भन्-रथः।

घ-विभागः

4. यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) विश्वामित्रेण सह तपोवनमुद्दिश्य गच्छता श्रीरामचन्द्रेण पथि यदवलोकितं भट्टिकाव्यमाश्रित्य तस्य समासेन वर्णनं कुरुत।

(ख) भट्टिकाव्यस्य वैशिष्ट्यं तथालोच्यतां येन महाकवेः काव्यशैल्यपि प्रकाशिता भवेत्।

5. यथेच्छं श्लोकद्वयं व्याख्येयम्। 5×2 = 10

(क) विम्बागतैस्तीरवनैः समृद्धिं
निजां विलोक्यापहृतां पयोभिः।
कुलानि सामर्षतयेव तेनुः
सरोज-लक्ष्मीं स्थलपद्महासैः॥

(ख) निशातुषारैर्नयनाम्बुकल्पैः
पत्रान्तपर्यागलदच्छविन्दुः।
उपारुरोदेव नदत्पतङ्गः
कुमुद्वतीं तीरतरुर्दिनादौ॥

(ग) प्रभातवाताहतिकम्पिताकृतिः
कुमुद्वतीरेणुपिशङ्गविग्रहम्।
निरास भृङ्गं कुपितेव पद्मिनी
न मानिनी संसहतेऽन्यसङ्गमम्॥

(घ) न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः॥

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——